यथाविहितं प्रत्ययो भवति, [1]यत् प्रथमासमर्थं छन्दश्चेत्तदादिर्भवति, यत्तदस्य इति निर्दिष्टं प्रगाथाश्चेत्ते भवन्ति, इतिकरणस्ततश्चेद् विवक्षा[2]। पङ्क्तिरादिरस्य[3] पाङ्क्तः प्रगाथः। आनुष्टुभः। जागतः। आदिः इति किम्? अनुष्टुभ् मध्यम् अस्य प्रगाथस्य। छन्दसः इति किम्? उदुत्यशब्द आदिरस्य प्रगाथस्य। प्रगाथेषु इति किम्? पङ्क्तिरादिरस्यानुवाकस्य। प्रगाथशब्दः क्रियानिमित्तकः क्वचिदेव [4]मन्त्रविशेषे वर्तते। यत्र द्वे ऋचौ प्रग्रथनेन तिस्रः क्रियन्ते, [5]स प्रग्रथनात् प्रकर्षगानाद् वा प्रगाथः इत्युच्यते।

[४२८] छन्दसः प्रत्ययविधाने नपुंसके स्वार्थ उपसङ्ख्यानम्। (म.भा. २.२८३)

[6]त्रिष्टुबेव त्रैष्टुभम्। जागतम्॥

## सङ्ग्रामे प्रयोजनयोद्धृभ्यः। (५६/१२६५)

सोऽस्य इति समर्थविभक्तिः, प्रत्ययार्थश्चानुवर्तते। प्रथमासमर्थविशेषणं प्रयोजनं योद्धारश्च। प्रत्ययार्थविशेषणं सङ्ग्रामः। प्रयोजनवाचिभ्यः योद्धृवाचिभ्यश्च शब्देभ्यः प्रथमासमर्थेभ्यः अस्य इति षष्ठ्यर्थे सङ्ग्रामेऽभिधेये यथाविहितं प्रत्ययो भवति। भद्रा प्रयोजनमस्य सङ्ग्रामस्य भाद्रः सङ्ग्रामः। सौभद्रः। गौरिमित्रः[7]। योद्धृभ्यः – अहिमाला योद्धारोऽस्य सङ्ग्रामस्य आहिमालः। [8]स्यान्दनाश्वः। भारतः[9]। सङ्ग्रामे इति किम्? सुभद्रा प्रयोजनमस्य [10]दानस्य। प्रयोजनयोद्धृभ्यः इति किम्? सुभद्रा [11]प्रेक्षिकाऽस्य सङ्ग्रामस्य॥

## तदस्यां प्रहरणमिति क्रीडायां णः। (५७/१२६६)

तत् इति प्रथमासमर्थाद् अस्याम् इति सप्तम्यर्थे णः प्रत्ययो भवति, यत तत् इति निर्दिष्टं प्रहरणं चेत् भवति। [12]यदस्याम् इति निर्दिष्टं क्रीडा तद् चेत् सा भवति। इतिकरणस्ततश्चेद् [13]विवक्षा। दण्डः प्रहरणमस्यां क्रीडायां दाण्डा। मौष्टा। प्रहरणम् इति किम्? माला भूषणमस्यां क्रीडायाम्। क्रीडायाम् इति किम्? खड्गः प्रहरणमस्यां सेनायाम्॥

## घञः सास्यां क्रियेति ञः। (५८/१२६७)

सा इति समर्थविभक्तिः। अस्याम् इति प्रत्ययार्थः स्त्रीलिङ्गः। क्रिया इति प्रकृत्यर्थविशेषणम्। [14]घञः इति प्रकृतिनिर्देशः। इतिकरणो [15]विवक्षार्थः। घञन्तात् कियावाचिनः प्रथमासमर्थाद् अस्याम् इति सप्तम्यर्थे स्त्रीलिङ्गे ञः प्रत्ययो भवति। घञः इति [16]कृद्ग्रहणं, तत्र गतिकारकपूर्वमपि गृह्यते। श्येनपातोऽस्यां वर्तते श्यैनंपाता। तैलंपाता। घञः इति किम्? [17]श्येनपतनमस्यां वर्तते। क्रिया इति किम्? प्राकारोऽस्यां वर्तते। अथ समर्थविभक्तिः प्रत्ययार्थश्च कस्मात् पुनरुपादीयते, यावता द्वयमपि प्रकृतमेव? [18]क्रीडायाम् इत्यनेन [19]तत्सम्बद्धम्, अतस्तदनुवृत्तौ क्रीडानुवृत्तिरपि सम्भाव्येत। सामान्येन चेदं विधानम्। दण्डपातोऽस्यां [20]तिथौ वर्तते दाण्डपाता तिथिः। मौसलपाता [21]तिथिः॥

## तदधीते तद्वेद। (५९/१२६९)

तत् इति द्वितीयासमर्थात् अधीते वेद इत्येतयोः अर्थयोः यथाविहितं प्रत्ययो भवति। छन्दोऽधीते छान्दसः। वैयाकरणः। [22]नैरुक्तः। निमित्तानि वेद नैमित्तः। [23]मौहूर्तः। औत्पातः। द्विस्तद्ग्रहणमधीयानविदुषोः पृथग्विधानार्थम्॥

---

1. तत् फ. 2. भवति इत्यधिकम् फ. 3. प्रगाथस्य इत्यधिकम् फ. 4. मन्त्रविशेषेषु एव ड. 5. स नास्ति फ. 6. आनुष्टुभम् इत्यधिकम् ग.ह, त्रिष्टुबेव त्रैष्टुभम् नास्ति ह. 7. वासवदत्तः इत्यधिकम् ह. 8. स्यान्दिताश्वः ह.क. 9. संग्रामः इत्यधिकम् क. 10. वैरस्य ह. 11. प्रेषिका ह.अ.क.ड. 12. यत्तदस्याम् ब. 13. विवक्षार्थः फ. 14. घञ् ब. 15. ततश्चेत् इत्यधिकम् फ. 16. कृद्ग्रहणे फ, कृद्ग्रहणात् ब. 17. श्येनपातनं ह. 18. तदा इत्यधिकम् फ. 19. तत् नास्ति फ. 20. तिथौ नास्ति फ. 21. भूमिः ब. क.ड.फ.ह. 22. नास्ति फ. 23. नास्ति फ, मौहूर्तिकः क.